## खिदेश्छन्दसि । (५२/३५१३)

विभाषा इति वर्तते । 'खिद दैन्ये' (धा.पा. ११७१) इत्यस्य धातोः एचः स्थाने छन्दसि [1]विषये विभाषा आकारः आदेशो भवति । चित्तं [2]चिखाद । चित्तं चिखेद । छन्दसि इति किम् ? [3]चित्तं खेदयति ॥

## अपगुरो णमुलि । (५३/३३७५)

'गुरी [4]उद्यमने' (धा.पा. १३९७) इत्यस्य धातोः अपपूर्वस्य णमुलि परतः एचः स्थाने विभाषा आकारः आदेशो भवति । अपगारमपगारम् । अपगोरमपगोरम् । 'आभीक्ष्ण्ये णमुल् च' (३.४.२२/३३४३) इति णमुल् । अस्यपगारं युध्यन्ते, अस्यपगोरं युध्यन्ते इत्यत्र 'द्वितीयायां च' (३.४.५६/३३७४) इति णमुल् ॥

## चिस्फुरोर्णौ । (५४/२५६०)

चिञ् (धा.पा. १२५२) स्फुर (धा.पा. १३९०) इत्येतयोः धात्वोः णौ परतः एचः स्थाने बिभाषा आकारादेशो भवति । चापयति, चाययति । स्फारयति, स्फोरयति ॥

## प्रजने वीयतेः । (५५/२६०३)

[5]णौ इति वर्तते । 'वी गतिप्रजनकान्त्यसनखादनेषु' (धा.पा. १०४९) इत्यस्य धातोः प्रजने वर्तमानस्य णौ परतः विभाषा आकारादेशो भवति । पुरोवातो गाः प्रवापयति, पुरोवातो गाः प्रवाययति । गर्भं ग्राहयति इत्यर्थः । प्रजनो हि जन्मन उपक्रमो [6]गर्भग्रहणम् ॥

## बिभेतेर्हेतुभये । (५६/२५९३)

णौ इति वर्तते, विभाषा इति च । हेतुरिह पारिभाषिकः स्वतन्त्रस्य[7] प्रयोजकः, ततो यद् भयम्, स यस्य भयस्य साक्षाद् हेतुः,[8] तद्धयम् हेतुभयम् । तत्र वर्तमानस्य 'ञिभी भये' (धा. पा. १०८४) इत्यस्य धातोः णौ परतः विभाषा आकारादेशो भवति । मुण्डो भापयते, मुण्डो भीषयते । जटिलो भापयते, जटिलो भीषयते । 'भीस्म्योर्हेतुभये' (१.३.३८/२५९४) इत्यात्मनेपदम् । 'भियो हेतुभये षुक्' (७.३.४०/२५९५) । स च आत्त्वपक्षे न भवति । लिभियोः ईकारप्रश्लेषनिर्देशाद् ईकारान्तस्य भियः षुक् विधीयते । हेतुभये इति किम् ? कुञ्चिकयैनं भाययति[9] (म.भा. ३.३९) । अत्र हि कुञ्चिकातो भयं [10]करणात्, न हेतोर्देवदत्तात्[11] ॥

## नित्यं स्मयतेः । (५७/२५९६)

णौ इति वर्तते, हेतुभये इति च । नित्यग्रहणाद् विभाषा [12]इति निवृत्तम् । 'ष्मिङ ईषद्धसने' (धा.पा. ९४९) इत्यस्य धातोः हेतुभयेऽर्थे णौ परतो नित्यमाकारादेशो भवति । मुण्डो विस्मापयते । जटिलो विस्मापयते[13] । भये इति किम् ? कुञ्चिकया एनं विस्मापयति । भयशब्देन [14]हेत्वर्थसामान्या इह [15]स्मयतेरर्थोऽभिधीयते । न हि मुख्ये भये स्मयतेर्वृत्तिरस्ति ॥

1. विषये नास्ति फ. 2. चखाद क.ड.ह. 3. चित्तं नास्ति क.ह.फ. 4. उद्यामने ग.फ. 5. वाक्यमिदं नास्ति क. 6. प्रथमं इत्यधिकम् क.ड. 7. कर्तुः इत्यधिकम् क. 8. भवति इत्यधिकम् फ. 9. अहिनैनं भाययति इत्यधिकम् ह. 10. कारणात् फ.ह. 11. इति इत्यधिकम् क. 12. इति नास्ति फ. 13. करणात् न संभवति इत्यधिकम् क. 14. धात्वर्थ इत्यधिकम् ड.फ.ह. 15. स्मयत्यर्थः ह.